रविमर्दी सशर्करो मारुतश्चण्डः। ऋतुविपरीतास्तरवो दीप्ता मृगपक्षिणो दिशां दाहः। निर्घातमहीकम्पाद्यो भवन्त्यत्र चोत्पाताः। न पृथक् फलानि तेषां शिखिकीलकराहुदर्शनानि यदि। तदुदयकारणमेषां केत्वादीनां फलं ब्रूयात्"। "यस्मिन् यस्मिन् देशे दर्शनमायान्ति सूर्यबिम्बस्थाः। तस्मिंस्तस्मिन् व्यसनं महीपतीनां परिज्ञेयम्। क्षुत्प्रम्लानशरीरा मुनयोऽप्युत्सृष्टधर्मसच्चरिताः। निर्मांसबालहस्ताः कृच्छ्रेणायान्ति परदेशम्। तस्करविलुप्तवित्ताः प्रदीर्घनिःश्वासाकुलिताक्षिपुटाः। सन्तः सन्नशरीराः शोकोद्भववाष्परुद्धदृशः। क्षामा जुगुप्समानाः स्वनृपतिपरचक्रपीडिता मनुजाः। स्वनृपतिचरितं कर्म च पराकृतं प्रब्रुवन्त्यन्ये। गर्भेष्वपि निष्पन्ना वारिमुचो न प्रभूतवारिमुचः। सरितो यान्ति तनुत्वं क्वचित् क्वचिज्जायते सस्यम्। दण्डे नरेन्द्रमृत्युर्व्याधिभयं स्यात् कबन्धसंस्थाने। ध्वाङ्क्षे च तस्करभयं दुर्भिक्षं कीलकेऽर्कस्थे। राजोपकरणरूपैश्छत्रध्वजचामरादिभिर्विद्धः। राजान्यत्वकृदर्कः स्फुलिङ्गधूमादिभिर्जनहा। एको दुर्भिक्षकरो द्व्याद्याः सुनरपतेर्विनाशाय। सितरक्तपीतकृष्णैस्तैर्विद्धोऽर्कोऽद्रुवर्णघ्नः। दृश्यन्ते च यतस्ते रविबिम्बस्योत्थिता महोत्पाताः। आगच्छति लोकानां तेनैव भयं प्रदेशेन"।
स्वार्थे क तत्रार्थे। लिंशत्तत्प्रविकाराद्दोक्ता तामसकीलका इति ख्याताः ह० स० ११ अ०।

**तामसध्यान** न० वटुकभैरवस्य ध्येयरूपभेदे। "तस्य ध्यानं त्रिधा प्रोक्तं सात्त्विकादिप्रभेदतः" इत्युपक्रमे सात्त्विकराजसे उक्त्वा तामसध्यानमुक्तं तन्त्रसारे यथा
"ध्यायेन्नीलाद्रिकान्तं शशिशकलधरं मुण्डमालं महेशं दिग्वस्त्रं पिङ्गलाभं डमरुमथ सृणिं शङ्खशूला-भयानि। नागं घण्टां कपालं करसरसिरुहैर्बिभ्रतं भीमदंष्ट्रं सर्पाकल्पं त्रिनेत्रं मणिमयविलसत्किङ्किणीनूपुराढ्यम्" "तामसं शत्रुशमनं कृत्याभूतगदापहम्" तन्त्रसा०।

**तामसिक** त्रि० तमसा निर्वृत्तं ठञ्। तमोगुणकार्ये त्रि०

**तामसी** स्त्री तमांसि भूम्ना सन्त्यस्यां प्रज्ञा० अण् ङीप्। अन्धकारबहुलायां रात्रौ २महाकाल्यां मेदि०। ३जटामांस्यां राजनि०। ४तमोगुणवत्यां स्त्रियाञ्च।

**तामालेय** त्रि० तामालदृश्चस्यादूरदेशादि सख्या० ढञ्। तमालवृक्षस्या-दूरदेशादौ।

**तामिस्र** पु० तमिस्रा तमस्ततिरस्त्यत्र अण्। नरकभेदे। "तामिस्रो ह्यन्धतामिस्र इत्युपक्रमे। तन्निदानरूपादि भाग०। ५।२६ उक्तं यथा "यस्तु परवित्तापत्यकलत्राण्यपहरति स हि कालपाशबद्धो यमपुरुषैरतिभयानकैस्तामिस्रे नरके बलान्निपात्यते" "स पर्यायेण यातीमान् नरकानेकविंशतिम्। तामिस्रमन्धतामिस्रं महारौरवरौरवौ। नरकं कालसूत्रञ्च महानरकमेव च। सञ्जीवनं महावीचिं तपनं सम्प्रतापनम्। संघातञ्च सकाकोलं कुड्मलं पूतिमृत्तिकम्। लोहशङ्कुमृजीषञ्च पन्थानं शाल्मलीं नदीम्। असिपत्रवनञ्चैव लोहदारकमेव च" मनुः अत्रोपक्रमे यातीति क्रियासम्बन्धापेक्षतया पन्थानं शाल्मलीं नदीमित्युत्तरत्र स्पष्टं द्वितीयाश्रवणाच्च तामिस्रादिशब्दानां द्वितीयान्ततैव नरकविशेषवाचितास्तस्य पुंस्त्वात्। शब्दकल्पद्रुमे क्लीवतोक्तिः मनुवचने द्वितीयान्ततामिस्रशब्दे प्रथमान्तत्वभ्रान्त्यैवेति बोध्यम्। तमिस्रया साध्यमण्। २ द्वेषे। "भेदस्तमसोऽष्टविधो मोहस्य च दशविधो महामोहः। "तामिस्रोऽष्टदशधा" सा० का०। "तामिस्रो द्वेषोऽष्टादशधा शब्दादयो दशविषया रञ्जनीयाः स्वरूपतः, ऐश्वर्यं त्वणिमादिकं न स्वरूपतो रञ्जनं किन्तु रञ्जनीयशब्दाद्युपायाः। ते च शब्दादय उपस्थिताः परस्परेणोपहन्यमानास्तदुपायास्त्वणिमादयः स्वरूपेणैव कोपनीया भवन्तीति। शब्दादिभिर्दशभिः सहाणिमाद्यष्टादशधेति तद्विषयो द्वेषस्तामिस्रोऽष्टादशविषयत्वादष्टादशधेति" तत्त्वकौ०। द्वेषमूलत्वात् भोगेच्छाप्रतिघातरूपे ३क्रोधे भाग० टी० श्रीधरः।

**तामु** त्रि० तम-उण्। स्तोतरि निघण्टुः।

**ताम्बली** स्त्री ताम्बूली+पृषो०। (पान) ताम्बूल्यां "सुक्का शताम्बल्यारसानाः" गोप० ब्रा० २।१०।७।

**ताम्बूल** न० तम-ऊलच् बुगागमः दीर्घश्च गौ० ङीप् तस्याः फलमण्। (पान) ख्याते १नागवल्लीदले। २क्रमुके च मेदि०। "ताम्बूलं कटुतिक्तमुष्णमधुरं क्षारं कषायान्वितं वातघ्नं कृमिनाशनं कफहरं दुर्गन्धनिर्नाशनम्। वक्त्रस्याभरणं विशुद्धिकरणं कामाग्निसन्दीपनं ताम्बूलस्य सखे! त्रयोदश गुणाः स्वर्गेऽपि ते दुर्लभाः" अपि चाहुः "ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम्। रस्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु। बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम्" भाव० प्र०। "अनिधाय मुखे पर्णं पूगं